# Shri Minakshi Stotram 2

# શ્રીમીનાક્ષીસ્તોત્રમ્ ૨

## Document Information

Text title : Minakshi Stotram 2

File name : mInAkShIstotram2.itx

Category : devii, mInAkShI, stotra, devI

Location : doc_devii

Transliterated by : Manoj S R manoj.sethuraman at gmail.com

Proofread by : Manoj S R manoj.sethuraman at gmail.com, NA

Description-comments : Hymn to Goddess Minakshi

Source : Stotrarnava 2 (Madras Govt Series) page 652/699

Latest update : February 21, 2020

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 21, 2020

*sanskritdocuments.org*

# શ્રીમીનાક્ષીસ્તોત્રમ્ ૨

ગૌરીં કાઞ્ચનપદ્મિનીતટગૃહાં શ્રીસુન્દરેશપ્રિયાં
    નીપારણ્યસુવર્ણકન્દુકપરિક્રીડાવિલોલામિમામ્ ।
શ્રીમત્પાણ્ડ્યકુલાચલાગ્રવિલસદ્રત્નપ્રદીપાયિતાં
    મીનાક્ષીં મધુરેશ્વરીં શુકધરાં શ્રીપાણ્ડ્યબાલાં ભજે ॥ ૧॥

ગૌરીં વેદકદમ્બકાનનશુકીં શાસ્ત્રાટવીકેકિનીં
    વેદાન્તાખિલધર્મહેમનલિનીહંસીં શિવાં શામ્ભવીમ્ ।
ઓઙ્કારમ્બુજનીલમત્તમધુપાં મન્ત્રામ્રશાખામ્બિકાં
    મીનાક્ષીં મધુરેશ્વરીં શુકધરાં શ્રીપાણ્ડ્યબાલાં ભજે ॥ ૨॥

ગૌરીં નૂપુરશોભિતાઙ્ઘ્રિકમલાં તૂણોલ્લસજ્જઙ્ઘિકાં
    રત્નાદર્શસમાનજાનુયુગલાં રમ્ભાનિભોરૂદ્વયામ્ ।
કાઞ્ચીબદ્ધમનોજ્ઞપીનજઘનામાવર્તનાભીહૃદાં
    મીનાક્ષીં મધુરેશ્વરીં શુકધરાં શ્રીપાણ્ડ્યબાલાં ભજે ॥ ૩॥

ગૌરીં વ્યોમસમાનમધ્યમયુતામુત્તુઙ્ગવક્ષોરુહાં
    વીણામઞ્જુલશારીકાન્વિતકરાં શઙ્ખાભકણ્ઠોજ્જ્વલામ્ ।
રાકાચન્દ્રસમાનચારુવદનાં રોલમ્બનીલાલકાં
    મીનાક્ષીં મધુરેશ્વરીં શુકધરાં શ્રીપાણ્ડ્યબાલાં ભજે ॥ ૪॥

ગૌરીં મઞ્જુલમીનનેત્રયુગલાં કોદણ્ડસુભ્રૂલતાં
    બિમ્બોષ્ઠીં સ્મિતકુન્દદન્તરુચિરાં ચામ્પેયનાસોજ્જ્વલામ્ ।
અર્ધેન્દુપ્રતિબિમ્બફાલરુચિરામાદર્શગણ્ડસ્થલાં
    મીનાક્ષીં મધુરેશ્વરીં શુકધરાં શ્રીપાણ્ડ્યબાલાં ભજે ॥ ૫॥

ગૌરીં કુઙ્કુમપઙ્કલેપિતલસદ્વક્ષોજકુમ્ભોજ્જ્વલાં
    કસ્તૂરીતિલકાલકાં મલયજાં ગન્ધોલસત્કન્ધરામ્ ।
લાક્ષાકર્દમશોભિપાદયુગલાં સિન્દૂરસીમન્તિનીં
    મીનાક્ષીં મધુરેશ્વરીં શુકધરાં શ્રીપાણ્ડ્યબાલાં ભજે ॥ ૬॥

ગૌરીં ચમ્પકમલ્લિકાસુકુસુમૈઃ પુન્નાગસૌગન્ધિકા-
    દ્રોણેન્દીવરકુન્દજાતિવકુલૈરાબદ્ધચૂલીયુતામ્ ।
મન્દારારુણપદ્મકેતકદલશ્રેણીલસદ્વેણિકાં
    મીનાક્ષીં મધુરેશ્વરીં શુકધરાં શ્રીપાણ્ડ્યબાલાં ભજે ॥ ૫॥

॥ ઇતિ શ્રીમીનાક્ષીસ્તોત્રં સમ્પૂર્ણમ્ ॥

Encoded and proofread by Manoj S R manoj.sethuraman at gmail.com

*Shri Minakshi Stotram 2*

pdf was typeset on February 21, 2020

Please send corrections to *sanskrit@cheerful.com*